This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद

ॐ श्रीगणेशायनमः ॥ मांडूक्योपनिषद्व्याख्यां करिष्ये परिचारिणीं। ओमात्माभेदसंबोधानंदात्मप्रकाशिनी।१। नामनामिनोर्लोके प्र
मां० भेदस्याप्रसिद्धत्वात् वस्तुतस्तु तस्योंकारस्य ब्रह्मविवर्तत्वात्। विवर्तानां विवर्ताधिष्ठानेन भेदशून्यत्वात्। अतः ओंकारं ब्र
टी० ह्मनामधेयं ब्रह्म इत्याह। ओमवतिब्रह्म बुद्ध्यादिष्टोऽद्भुतिरित्यों इति ओंकारानुकरणार्थः। एतदुक्तमोंकाररूपं जगत्पर्णस्यांकु
१ रस्थानीयं। ब्रह्मणा तादात्म्यं प्राप्तो ब्रह्मणो विकारो नामधेयं च अक्षरं वर्णात्मकं। इदं विविधप्रत्ययगम्यं चेतनाचेतनात्मकं
जगत्। सर्वं निखिलं तस्य सर्वात्मकस्योंकारस्य। उपव्याख्यानं उपसामीप्येन विस्पष्टमासमंतात्कथनं विवरणमित्यर्थः। भू

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति ॥ सर्व
मोंकार एव यच्चान्यत् त्रिकालातीतं तदप्योंकार एव सर्वं ह्येतद्ब्रह्माऽ
यमात्मा ब्रह्म ॥

८ तं अतीतं भवद्वर्तमानं भविष्यं अनागतं इति अनेन प्रकारेण। सर्वं निखिलं ओंकार एव प्रणव एव न त्वन्यत्। यच्चान्यदपि प्रसिद्धं
सदसदात्मकं। अन्यदुक्ताद्व्यतिरिक्तं त्रिकालातीतं उक्तकालत्रयासंस्पृष्टं। तदपि उक्तं ब्रह्मनरविषाणादिकमिति अ
पि शब्दः पूर्वेण समुच्चयमाह। ओंकार एव व्याख्यातं। ओंकारस्य ब्रह्मणो नामधेयादि संव्याप्तिरित्यभिप्रायेणाह। सर्वं
निखिलं हि निश्चितं एतत्प्रपंचजातं ब्रह्म सत्यज्ञानादिलक्षणं। ननु जडस्यैव ब्रह्मात्मत्वमुक्तं न चेतनस्येति शंकानिरा
करणार्थमाह। अयमनुभूयमानः। आत्मा प्रत्यक्षत्वालंबनश्चेतनस्त्वंपदार्थः ब्रह्म उक्तं तत्पदार्थः ॥ ॥ ॐ ॥

Acc. NO. ~~2671~~ M. 1718
Title - माण्डूक्योपनिषद् (सटीक)
टी. :- माण्डूक्योपनिषद्दीपिका.
Author - टी. :- शंकरानंद.
Date - संवत् - 1892.

folio - 4
Xerox - 7.

KKSU LIBRARY RAMTEK 441 106 Dist Nagpur M. 1718

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॥ कार्यकारणभावमंतरेण ब्रह्मतादात्म्यं प्राप्तः॥ अयमात्मा व्याख्यातः॥ चतुष्पात् चत्वारः पादा यस्य स चतुष्पात्। गोरि
व किं चतुष्पादित्याशंक्याह। जागरितस्थानः जागरितं स्थानं यस्य स जागरितस्थानः॥ वहिः प्रज्ञः वहिरूपादौ
चक्षुरादिद्वारैः प्रज्ञा यस्य स वहिः प्रज्ञः॥ सप्तांगः सप्त संख्यानि द्युसूर्यवाय्वाकाशापृथिव्याहवनीयाख्यानि।
मूर्द्धचक्षुःप्राणांतरात्मिस्थानाशयपादाख्यान्यंगानि यस्य स सप्तांगः॥ एकोनविंशतिमुखः पंचज्ञानकर्मेंद्रियप्राणांतः
करणचतुष्टयरूपाणि मुखान्येकोनविंशतिसंख्याकानि यस्य स एकोनविंशतिमुखः॥ स्थूलभुक् स्थूलं रूपादिकं भुं

सोयमात्मा चतुष्पात् जागरितस्थानो वहिःप्रज्ञः सप्तांग एकोनविंशतिमुखः स्थूलभुक् वैश्वानरः
प्रथमः पादः स्वप्नस्थानोऽन्तःप्रज्ञः सप्तांग एकोनविंशतिमुखः प्रविविक्तभुक्॥ ॥ ॥

क्ते इति स्थूलभुक्॥ वैश्वानरः विश्वेषामयं नरः॥ विश्वेवानरः॥ अस्य विश्वाख्यो सो नरश्चेति विश्वानरः स एव वैश्वानरः॥ अ
थवा विश्वेषां नरशाह्ववाख्यानां चतुर्विधानां देहानामधिष्टातायं वैश्वानरः॥ प्रथमा पादः आत्मनोयं सर्वैः सुकरावगमत्वात् प्रथ
मो भ्राः॥ इदानीं द्वितीयं पादमाह॥ स्वप्नस्थानः स्वप्नं जागरितवासनाजन्यं स्थानं यस्य स स्वप्नस्थानः॥ अंतःप्रज्ञः॥ अंतर्मानसवास
नाविलासे प्रज्ञा बुद्धिर्यस्य सोंतःप्रज्ञः॥ सप्तांग एकोनविंशतिमुखः व्याख्यातं॥ प्रविविक्तभुक् प्रविविक्तं सूक्ष्मं भुंक्त इति प्रविविक्तभुक्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मां० तैजसः तेजोंतःकरणं कर्तृकरणकार्यादिरूपेण परिणतं तदेव स्थूलशरीरादिहीनं यस्य स तैजसः ॥ अंतःकरणस्य स्वप्ने
स्वप्नेः जागरितानंतरभावित्वात् । द्वितीयः पादः स्पष्टः । इदानीं तृतीयं तृतीयं पादं वक्तुमाह । यत्र यस्मिन् काले सुप्तः
दी० उपरतेंद्रियग्रामः । न कंचन न कामं कामयते । कमपि पुण्यपापहेतुभूतं । अत्र देशकालादिकं नाभिलषति । न कंचन स्व
प्नं पश्यति । कमपि शुभमशुभं वासनाविलासं नावलोकयति । तत्कामाकामनस्वप्नानवलोकनरूपं सुषुप्तं जाग
२ ट निद्राप्राप्तिस्थानं । सुषुप्तस्थानः सुषुप्तं स्वयं अकृत्वा व्याख्यातस्थानं यस्य स सुषुप्तस्थानः एकीभूतः सर्वजग
द्बीजभूतस्यावरणात्मकस्याज्ञानस्यानुपरमादनेकोप्यंतःकरणादिविक्षेपोपरमादेकतां गतः ॥ प्रज्ञानघन एव प्र

कामं तैजसो द्वितीयः पादः यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं सुषुप्तस्था
नः एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥ ॥ ॥

ज्ञानमात्मनो रूपं ब्रह्मणाभेदरहितं स्वयंप्रकाशं घनः पिंड इव स एव घनत्वं तः करणादिवाह्यं चानच निरानंद इ
त्याद । आनंदमयः विक्षेपाणामुपरमात्स्वरूपस्यानुवृत्ते रूप स्वस्वरूपानंदप्रचुरः ॥ हि यस्मात्तस्माच्चानंदो विदे
पाभावोपलक्षित आत्मातमेव भुंक्ते । ज्ञानवृत्तिभिरवगच्छतीत्यानंदभुक् ॥ चेतोमुखः चेतोज्ञात्मा स्वस्वरूपवो
धः स एवावरणशक्तिसहितो मुखं यस्य स चेतोमुखः ॥ प्राज्ञः प्रकृष्टः स्वयंप्रकाशः आनंदात्मनि साक्षाज्ञप्ति
रज्ञानवृत्तिरूपो वोधो यस्य स प्रज्ञः प्रज्ञ एव प्राज्ञः । उक्तावस्थाद्वयाभावेनावगम्यमानत्वात्तृतीयः पादः २
स्पष्टं ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं प्राज्ञं प्रस्तौति सर्वकारणत्वात्तस्य। एष उक्तः प्राज्ञः सर्वेश्वरः सर्वनियामकः॥ एष प्राज्ञः सर्वज्ञः सर्वश्चासौ ज्ञश्चेति
सर्वकार्यात्मकत्वादज्ञानस्य भावाभावं जानातीति सर्वज्ञः॥ एष प्राज्ञः अंतर्यामी अंतर्यमयता एष प्राज्ञः योनिः का
त्वे रणं। सर्वस्य निखिलस्य चेतनात्मकस्य जगतः योनिर्हेतुमाह। प्रभवाप्ययौ उत्पत्तिविनाशौ हि यस्मात् भूतानां चे
तनाचेतनरूपाणां इतो भवति इति शेषः॥ इदानीं तुरीयपादमाह। नांतः प्रज्ञं नर्मन सवासनाविलासदर्शनत्वात
स्वप्नं न बहिः प्रज्ञं नेंद्रियैर्विषयावलोकनपरं नो भयतः प्रज्ञं जागरणस्वप्नांतरभावस्यावबोधशून्यं। न प्रज्ञानघ
नं नाज्ञानमात्रबोधं। न प्रज्ञं निर्विकल्पकबोधशून्यं। नाप्रज्ञं नबोधाभावरूपं। अदृष्टं प्रत्यक्षादिप्रमाणैरनव

एष सर्वेश्वरः एष सर्वज्ञः एषोंतर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां॥ नांतःप्रज्ञं न बहिः
नाप्रज्ञं प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमव्यपदे
श्यमेकात्मप्रत्ययसारं प्रपंचोपशमं शांतं शिवमद्वैतं चतुर्थं मन्यते॥ ॥ ॥

लोकितं। अव्यवहार्यं वचनादानादिव्यवहारगंधरहितं। अग्राह्यं सर्वप्रकारग्रहणायोग्यं। अलक्षणं लिंगबला
दिबोधशून्यं। अचिंत्यं अंतःकरणग्रहणविषयभूतं। अव्यपदेश्यं पृथिवीत्यादिव्यपदेशाव्यपदेशायोग्यं। एका
त्मप्रत्ययसारं सर्वावस्थितप्रत्ययः। सारभूतोऽवगतिहेतुत्वेन यस्मिंस्तदेकात्मप्रत्ययसारं। वाङ्मनसाद्यतीतमप्या
त्मबोधेनावगंतुं शक्यमित्यर्थः॥ प्रपंचोपशमं प्रपंचस्य कार्यकारणात्मकस्योपशमोऽभावो यस्मिन् तत्प्र
पंचोपशमं। शिवं स्वयंप्रकाशमानानंदात्मस्वरूपत्वात् मंगलं। अद्वैतं आनंदात्मव्यतिरिक्तशून्यं। चतुर्थं तु
[illegible] व्याप्त्यमपि पूर्वापेक्षया वगच्छंति॥ शिवः॥ हरिः॥ विष्णुः॥ कृष्णः॥ रामः॥॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपोप्यविद्यया चतुष्पादात्मा अनेनात्माः स्वत्प्रत्यय व्यवहार योग्यः॥ स तुरीयोपगत
त्वमस्तु [illegible] योविशेषेण साक्षात्कर्त्तव्यः॥ इदानीमात्मोंकारयोरभेदं कंठत आह॥ सोयमात्मा ध्या-
मां॰ रव्यातः। अध्यादरं अक्षराण्येकारोकारमकारा ई मात्राख्यानि पादत्रमितान्यधिकृत्याक्षरं ओंकारः। ओंकारस्वरू
टी॰ पः॥ ओंकारस्यात्मस्वरूपत्वे साम्यं। अधिमात्रं अकारादयस्त्रियो मात्रा विश्वादि पाद सम संख्या अधिकृत्वा
१ धिमात्रं। आत्मोंकारयोरभेदे कारणमाह। पादाः विश्वतैजसप्राज्ञतुरीयाख्याः॥ मात्राः अकारोकारमकारा
र्धमात्राः॥ [illegible] दृढीकर्त्तुमुक्तं विपर्ययेण निर्दिशति। मात्राश्च पादाः॥ चकार एवकारार्थः॥ नायं विपर्यनिर्दे

स आत्मा स विज्ञेयः सोयमात्माध्यक्षरमोंकारोधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो म
कार इति जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राप्तेरादिमत्वाद्वा॥ ॥ ॥

तु शास्त्रमहमिति वदुपचारार्थः॥ किं घटः कलशः कलशो घट इतिवन्निरूपचरितं मात्राणां पदानां च तादात्म्यमि
त्येवकारार्थः॥ व्याख्यातमन्यत्। अर्धमात्रायास्तुरीयपादस्वरूपत्वात्तुरीयस्य च पूर्वपादत्रयादत्यंतवैलक्षण्यातो
र्धमात्रां परित्यज्य शेषमात्रा आह। अकारोकारमकाराः स्पष्टं। इति मात्रात्रयनिर्देशार्थः॥ इदानीं विभागेन मात्राणां पाद
रूपतामाह। जागरितस्थानो वैश्वानरोऽकारः प्रथमपादः॥ पूर्वा मात्रा व्याख्यातमन्यत्। अकारस्य पूर्वमात्रात्वमुपप
त्तिमाह। आप्तेर्व्याप्तेः अकारो हि जागरितस्थानादिकं सर्वं आप्नोति। प्रकारांतरेण पुनर्निरुक्तमाह। आदिमत्वाद्वा। ३
अथ आ इ ई त्येवमादिः॥ स यस्मिन्नस्ति सोयमादिस्तस्य भावः॥ आदिमत्वं आदिसामान्यवत्त्वमित्यर्थः॥ ॥ ॥
दि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रथमत्वादेपियथापदानामादिरतएवतत्सामान्यवान्। आप्नोतित्विनचेतरत्पादजातंपूर्वभावित्वाद्वाशब्दः आप्नोति
पक्षांतरार्थः।। इदानीविश्वाकारयोरादिमत्वज्ञानात्फलमाह। आप्नोतिं ह वसिद्धा वैसमर्थीभाणात्सर्वान्नि
तिलान् कामानुकाम्यमानान्पुत्रेत्यादीन्। आद्येः फलमुक्ता आदिमत्त्वस्यफलमाह आदिश्वस्थानांमध्ये
सर्वेषुकार्येषुप्रथमगण्यश्चकारादपि। प्रथमफलंभवतिस्पष्टं। यस्यफलंतमाह। यःपादमात्रातादात्म्य।
ज्ञः।। एवंउक्तेनप्रकारेणोक्तयोःपादमात्रयोःसौमान्यंवेदजानातिस आप्नोतीत्यन्वयः स्वप्नस्थानस्तैजसउका
रोद्वितीयमात्रास्पष्टं। तैजसोकारयोस्तादात्म्ये हेतुमाह उत्कर्षादूर्ध्वभावित्वेनोत्कृष्टत्वात्। पुनरन्यात्सामान्य

वाप्नोतिहवैसर्वान्कामानादिश्वभवतियएवंवेदस्वप्नस्थानस्तैजसउकारोद्विती
यामात्रोत्कर्षादुभयत्वाद्वोत्कर्षतिहवैज्ञानसंततिंसमानश्चभवतिनास्याब्रह्म
वित्कुलेभवतियएवंवेदसुषुप्तस्थानःप्राज्ञोमकारस्तृतीयामात्रा॥ ॥ ॥

मा्ह। उभयत्वाद्वाविश्वाकाराभ्यांतैजसोकारयोर्द्वितीयत्वात्। वाशब्दःपूर्ववत्। इदानीमुक्तज्ञानफल
माह। उत्कर्षतिहवैज्ञानसंततिः।। शिष्यप्रशिष्यादिज्ञानसंतत्योत्कृष्टोभवति। व्याख्यातमन्यत्। उभयत्व
ज्ञानस्यफलमाह। समानश्चभवति। योहिस्वावस्थानदेशेवोत्कृष्टःतत्समानः। चकारात्तस्मादुत्कृष्टो
पिभवति। इदानीउभयज्ञानस्यफलमाह। नास्याब्रह्मवित्कुलेभवति। अस्योत्कर्षोभयत्वज्ञानवतः। कुलेन्व
येशिष्यप्रतिशिष्यादिरूपेऽहं ब्रह्मास्मीत्येतज्ज्ञानशून्योनभवति यएवंवेदव्याख्यातं॥ सुषुप्तस्थानः प्राज्ञो
मकारस्तृतीयामात्रास्पष्टं॥ तत्सद्ब्रह्मणेनमः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मात्रा मकारयोस्तादात्म्ये हेतुमाह। मितेर्मिनोतिद्विधात्र: सर्वमात्मनि तादात्म्येन अकारोकारौ प्रविष्टौ
वमात्मस्वरूपेणापि ओंकारस्यानिष्ठत्ते। अपीतेर्वा मकारे ओंकारे वर्तमानस्य स्पष्टं नोपलभ्यते। ततः मका
रे अग्नेव प्रलयः प्रसिद्धः प्रलयसामान्यात्। वाहुः पूर्ववत्। इदानीं मिनोतिज्ञानस्य फलमाह। मिनो।
मा ति ह वा इदं सर्वं इदं विविधप्रत्ययगम्यं जगन्निखिलं प्रस्थमिवयावन्मिनोति सर्वात्मभावेन स्वात्मनि
दी० प्रक्षिपति। अपीति ज्ञानस्य फलमाह। अपीतिश्च भवति सर्वाधिकेन प्रलयः। सर्वस्य च कारात्स्वयं प्रल
८ यस्थानश्च भवति। य एवं वेद व्याख्यातं। अर्धमात्रायाः अवयवसौंकारस्यावयविनश्चाभेदमुररीकृत्य

मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद अमात्रश्च
तुर्थो व्यवहार्यः प्रपंचोपशमः शिवोऽद्वैत एवमोंकार आत्मैव संविशत्या
त्मनात्मानं य एवं वेद॥ इत्यथर्ववेदे मांडूक्योपनिषत्॥ ॐ ॥ ॥

चतुर्थपादरूपनिरंजनात्मस्वरूपतामोंकारस्याह। अमात्रः अकारादिमात्राशून्यः। चतुर्थो व्यवहार्यः
प्रपंचोपशमः शिवोऽद्वैतः स्पष्टं। एवं उक्तेन मात्रातादात्म्येन ओंकार आत्मैव स्पष्टं। संविशति सम्यक् प्रवेशं करो
ति। आत्मना ओंकारेण आत्मानं आनंदात्मस्वरूपं यः। ओंकारात्मज्ञः। एवमुक्तेन प्रकारेण ओंकारात्मनोस्तादा
त्म्यं वेद जानाति तस्योंकाररूपानंदात्मप्राप्तिफलमर्थसिद्धं ततः अकृत्वा नोक्तं अथवा संविशत्यात्मनात्मानं
मितीदं फलवाक्यमस्तु॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपाद शिष्यस्य शंकरानंद श्री
भगवतः कृतिर्मांडूक्योपनिषद्दीपिका समाप्ता॥ ॐ नमः शिवाय॥ ॐ नमः शिवाय॥ संवत् १८९२ ॥ शिवः

KKSU LIBRARY
RAMTEK
441 106
M-1718
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=05.10.20 11:32
,TRANSFERRED=2020/10/05 at 11:33:27
,PAGES=7
,TYPE=STD
,NAME=S0003836
,Book Name=M-1718-MANDUKYOPNIDHAD
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection